# Mankanakarishikritam Rudra Stotram

# मङ्कणकऋषिकृतं रुद्रस्तोत्रम्

## Document Information

Text title : Mankanakarishikritam Rudra Stotram

File name : mankaNakaRRiShikRRitaMrudrastotram.itx

Category : shiva, mahAbhArata, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | AraNyakaparva | adhyAya 81/107-111||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# मङ्कणकऋषिकृतं रुद्रस्तोत्रम्

ततो भस्म क्षताद्राजन्निर्गतं हिमसन्निभम् ।
तद्दृष्ट्वा व्रीडितो राजन्स मुनिः पादयोर्गतः ॥ १०७॥

नान्यं देवमहं मन्ये रुद्रात्परतरं महत् ।
सुरासुरस्य जगतो गतिस्त्वमसि शूलधृक् ॥ १०८॥

त्वया सृष्टमिदं विश्वं त्रैलोक्यं सचराचरम् ।
त्वामेव भगवन्सर्वे प्रविशन्ति युगक्षये ॥ १०९॥

देवैरपि न शक्यस्त्वं परिज्ञातुं कुतो मया ।
त्वयि सर्वे च दृश्यन्ते सुरा ब्रह्मादयोऽनघ ॥ ११०॥

सर्वस्त्वमसि लोकानां कर्ता कारयिता च ह ।
त्वत्प्रसादात्सुराः सर्वे मोदन्तीहाकुतोभयाः ।
एवं स्तुत्वा महादेवं स ऋषिः प्रणतोऽभवत् ॥ १११॥

इति महाभारते आरण्यकपर्वणि ८१ अध्यायान्तर्गतं
मङ्कणकऋषिकृतं रुद्रस्तोत्रं सम्पूर्णम् ।

महाभारत । आरण्यकपर्व । अध्याय ८१/१०७-१११॥

mahAbhArata . AraNyakaparva . adhyAya 81/107-111..

Proofread by PSA Easwaran

Please send corrections to *sanskrit@cheerful.com*